# श्रीमद्वाल्मिकीयरामायणे श्रीरामस्य संवादकौशल्यम्।

डॉ. जयश्री सकळकळे

**प्रस्तावना**

आधुनिककाले व्यावसायिकक्षेत्रे व्यवहारकौशल्ये नैपुण्यमनिवार्यम्। व्यवहारकौशल्येषु संवादकौशल्यं प्रथमम्।संवादकौशल्यस्य प्रशिक्षणमधुना प्राधान्येन दीयते । व्यावसायिकस्तरे उपयोगीनाम् एतेषां कौशल्यानां व्यक्तित्त्वविकासे महत्त्वं विद्यते।आऋग्वेदात् संवादाः संस्कृतसाहित्यस्य प्रमुखमङ्गम्। सरमापणिसंवादः संवादस्य उत्तमोदाहरणम् अस्ति। ऋग्वेदे संवादेषु विविधानां विषयाणां विवेचनं लभ्यते। उपनिषत्सु अपि जिज्ञासूनां संवादाः वर्तन्ते। बृहदारण्योपनिषदि याज्ञवल्क्य-गार्गीसंवादः, याज्ञवल्क्य- मैत्रैयीसंवादः, कठोपनिषदि यमनचिकेतसंवादः च अन्ये अपि संवादाः प्रसिद्धाः सन्ति। आर्षमहाकाव्ययोः रामायणमहाभारतयोः प्रचुरमात्रेण संवादाः सन्ति। आर्षमहाकाव्ययोः कथाविकासः एव संवादानां आधारेण भवति। रामायणे श्रीरामस्य, सीतायाः, हनुमतः संवादाः सन्ति। वाल्मीकिरामायणे श्रीरामस्य सीतया, दशरथेन, कैकेय्या, हनुमता, सुग्रीवेण, अन्यैः सह संवादाः विद्यन्ते। एतेषु संवादेषु श्रीरामस्य संवादानां मुख्यवैशिष्ट्यानि विशेषरूपेण दृश्यते ।

संवादकौशल्यं भारतीयसाहित्येषु सर्वत्र लभ्यते। किन्तु कौशल्यरूपेण संवादस्य अभ्यासः इति काचित् आधुनिकी परम्परा। संवादस्य साङ्गैः पठनं सम्प्रति जनाः कुर्वन्तः सन्ति। अतः अस्मिन्संशोधनपत्रे श्रीरामस्य संवादकौशल्यस्य विवेचनाय विश्लेषणाय च प्रयतते ।

**संशोधनस्य उद्देशाः**

1) वाल्मीकियरामायणे श्रीरामस्य संवादानां विवेचनम् ।
2) वाल्मीकियरामायणे श्रीरामस्य संवादानां आधुनिकसंवादकौशल्यतत्त्वानां आधारेण विश्लेषणम् च।

**संवादकौशल्यस्य सङ्कल्पना**

व्यवसायकौशल्यसम्बन्धिषु सर्वेषु ग्रन्थेषु संवादकौशल्यस्य विस्तारेण विवेचनम् प्राप्यते। संवादे संवादस्य हेतुः सर्वेषु अङ्गेषु प्रथमस्थाने वर्तते।वक्ता, श्रोता, संवादस्य विषयः च एतानि अङ्गानि सन्ति।संवादः सुस्पष्टः, पूर्णः, उचितः, सटीकः आकाङ्क्षायोग्यतासंनिधिसहितः श्रोतुः प्रतिस्पन्देन सह च भवेत्। सुसूत्रता सुस्पष्टता एव सुसंवादस्य द्वे तत्त्वे।संवादेन मनुष्यस्य पूर्णं व्यक्तिमत्त्वं प्रकाशितं भवति। प्रत्यक्षसंवादस्य नैकेलाभाः । प्रत्यक्षसंवादे वक्ता यं सन्देशं वक्तुम् इच्छति सः सद्यः एव दातुं शक्यते। देहभाषायाः अपि साहाय्यं प्रत्यक्षसंवादे भवति। संवादस्य परिपूर्णप्रक्रिया तस्याः अभ्यासः

सहा. प्रा. संस्कृतविभागः
शंकरलाल खंडेलवाल महाविद्यालयः, अकोला
jayashree.sakalkale@gmail.com

व्यवसायकौशल्यसम्बन्धिषु सर्वेषु ग्रन्थेषु दीयते।

**श्रीरामस्य संवादानां विवेचनम् -**

श्रीरामस्य नैके संवादाः सन्ति वाल्मीकिरामायणे। तेषां सर्वेषां विवेचनं कर्तुं अशक्यम्। अतः ये महत्त्वपूर्णाः तेषाम् एव विवेचनम् अत्र क्रियते।

1) श्रीरामस्य प्रथमसंवादः विश्वामित्रेण सह अस्ति। अत्र श्रीरामेण शिष्यरूपेण गुरोः विश्वामित्रात् बलातिबलाविद्ये गृहीते।

विद्याद्वयमधीयाने यशश्चाथ भवेद् भुवि।
पितामहसुते ह्येते विद्ये तेजःसमन्विते।[1]

विश्वामित्रः तौ रामलक्ष्मणौ विद्याविषये विस्तारेण अकथयत्। गङ्गायाः पारं गत्वा ताटकावनस्य ताटकायाः च परिचयम् अकारयत्। स्त्रीवधविषये श्रीरामस्य शङ्कायाः सकारणं समाधानं कृत्वा ताटका वधाय प्रेरितवानम् तं मुनिः।

नहि ते स्त्रीवधकृते घृणा कार्या नरोत्तम।
चातुर्वर्ण्यहितार्थं हि कर्तव्यं राजसूनुना।।[2]

पश्चात् विश्वामित्रः एव सिद्धाश्रमस्य वृतान्तं तौ पृच्छन्तौ श्रावितवान् मिथिलां अनयत् च। मार्गे सर्वस्य प्रदेशस्य वर्णनेन तेन रामस्य ज्ञानं वर्धितं गङ्गायाः उत्पत्तिकथा श्राविता च। मार्गे आगतानाम् प्रदेशानां, राज्यानां आश्रमाणां च परिचयं सः अकारयत् । अहल्योद्धारः अपि रामेण अत्र कृतः। रामः अहल्यायाः चरणस्पर्शं चकार।

त्रयाणामपि लोकानां यावद् रामस्य दर्शनम्।
शापास्यान्तमुपागम्य तेषां दर्शनमागता।
राघवो तु तदा तस्याः पादौ जगृहतुर्मुदा।
स्मरन्ती गौतमवचः प्रतिजग्राह सा हि तौ।।[3]

2) विवाहादनन्तरं शिवधनोः भङ्गेन क्रोधितेन परशुरामेण सह रामस्य सुदीर्घसंवादः जातः। तस्मिन् संवादे रामः न केवलं परशुरामस्य क्रोधम् अपि तु तस्य पराक्रमम् अपि शशाम। श्रेष्ठे वैष्णवधनुष्ये शरं युयुजे। येन शान्तः सन् परशुरामः स्वस्थानं जगाम।

ब्राह्मणो ऽसीति पूज्यो मे विश्वामित्रकृतेन च।
तस्माच्छक्तो न ते राम मोक्तुं प्राणहरं शरम्।।[4]

3) यौवराज्याभिषकसमये कैकेय्या रामस्य दीर्घः संवादः। तस्मिन् संवादे स्वपितुः अवस्थां दृष्ट्वा तीव्रवेदनाम् अनुभवन् रामः कैकेयीं वदति यत् पूर्वं सा किमर्थं न उक्तवती तम्। सः तस्याः इच्छाम् अनुसृत्य वनं गच्छेत्। कैकेय्याः कृत्येन सः दुःखितः किन्तु न तां निनिन्द। अस्मिन् संवादे कैकेय्याः वाणी परुषा रुक्षा च ।

न न्यूनं मयि कैकेयि किंचिदाशंससे गुणान्।
यद् राजानमवोचस्त्वं ममेश्वरतरा सती।।[5]

4) अनन्तरं सः कौशल्यायाः सदनम् अगच्छत्। तां स्वस्य वनगमनं सर्वं पितृगतं वृतान्तं च आश्रावयत् । कौशल्यायाः सान्त्वनम् अपि चकार। तेन सह वनगमने उत्सुकां मातरं उचितोपदेशेन धैर्यं ददौ।मातापुत्रयोः संवादस्य उत्तमोदाहरणम्।

कैकेय्या वञ्चितो राजा मयि चारण्यमाश्रिते।
भवत्या च परित्यक्तो न नूनं वर्तयिष्यति।।[6]

5) श्रीरामस्य सीतायाः प्रदीर्घः संवादः अस्मिन्

सर्गे वर्तते। सः तस्य वनगमनादनन्तरं तस्याः व्यवहारं सर्वान् प्रति उचितं भवेत् इति उपदेशं कुर्वन् दृश्यते। किन्तु सीता तेन सह वनं गन्तुं उत्सुका। रामः वनजीवनं कठिनम् अस्ति इति कथयाँचकार। सा पतिगमनम् एव भार्याणां कृते श्रेयस्करं इति प्रतिपादितवती।

यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघव।
अग्रतस्ते गमिष्यामि मृद्नन्ती
कुशकण्टकान्।।
सुखं वने निवत्स्यामि यथैव भवने पितुः।
अचिन्तयन्ती त्रीँल्लोकां श्चिन्तयन्ती
पतिव्रतम्।।[7]

सीता वनजीवनस्य दुर्धरतां श्रुत्वा अपि वनगमनाय एव निश्चयं चकार। अन्ततोगत्वा रामः सीतां तस्याः निश्चयं श्रुत्वा तेन सह वनगमनाय स्वीकृतिम् अयच्छत्।

मम सन्ना मतिः सीते नेतुं त्वां दण्डकावनम्।
वसिष्यामीति सा त्वं मामनुयातुं सुनिश्चिता।।[8]

रामः लक्ष्मणम् अपि वनगमनं प्रति निरुत्सुकं कर्तुं प्रयतते। किन्तु लक्ष्मणः रामेण विना जीवनम् अशक्यम् इति उक्त्वा स्वमतस्य समर्थनम् एव करोति।

6) चित्रकूटपर्वते श्रीरामस्य भरतेन सह मेलनं वाल्मीकिना वर्णितम्। भरतः रामं पितुः करुणमरणस्य वार्तां शुश्राव । रामः पुनः अयोध्याम् आगच्छतु इति प्रार्थयत् च।

स समृद्धां मया सार्धमयोध्यां गच्छ राघव।
अभिषेचय चात्मानं कुलस्यास्य भवाय नः।।[9]

भरतः पुनः पुनः तदेव बभाण किन्तु श्रीरामः निश्चयपूर्वकं न इति उक्त्वा अन्ततः तस्मै पादुकां ददौ। भ्रातृप्रेमस्य उत्तमं दर्शनम् एव तयोः संवादः।

7) हनुमतः रामस्य संवादः पम्पासरसः तीरे बभूव। बहुकौशल्येन स्ववाक्पटुत्वं प्रदर्शयन् हनुमान् रामं सुग्रीवस्य
वार्तां श्रावयति। मधुरभाषया तेषां चित्तं विलोभयति।

पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ।
अन्योन्यसदृशौ वीरौ देवलोकादिहागतौ।।
यदृच्छयेव सम्प्राप्तौ चन्द्रसूर्यौ वसुन्धराम्।
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ।।[10]

तस्य वचनस्य प्रशंसापि रामेण कृता अस्ति किष्किंधाकाण्डे।

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः।
नासामवेदविदुषः शक्यमेवं विभाषितुम्।
न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च सर्वेषु दोषः संविदितः
क्वचित्।।[11]

एतत् श्रेष्ठसंवादस्य उदाहरणम्।अस्मिन् संवादे उत्कृष्टसंवादस्य प्राचीनभारते विद्यमाना संवादस्य संकल्पना प्राप्यते।

8) अग्निपरीक्षासमये किञ्चित् हृद्यः वेदनादायकः सीतारामस्य संवादः। प्रगाढविश्वासे सति रामः तां परुषशब्दैः प्राताडयत्।सा रामस्य निर्भत्सनां चकार चक्रन्द च। न किं सः जानाति यद् सीता नास्ति कलङ्किनी ? राज्ञीविषये न स्यात्

कापि शङ्का कस्यचिदपि मनसि इत्येव रामस्य कामना। किन्तु स्वपत्नीविषयकं तस्य स्वभावविरोधी आक्षेपार्हं तस्य वचनं पठित्वा दुःखं प्राप्नोति जनः।

9) रामसुग्रीवसंवादे सुग्रीवस्य मनसि रामस्य पराक्रमविषये किञ्चित् शङ्का, तस्याः निरसनं लीलया चकार रामः।अत्र सुग्रीवः वालेः पराक्रमवर्णनम् अकरोत् ।

वालिनः पौरुषं यत्तद् यच्च वीर्यं धृतिश्च या।
तन्ममैकमनाः श्रुत्वा विधत्स्व यदनन्करम्।।[12]

सुग्रीवस्य कार्यसिद्धिः अवश्यं भवेत् इति रामस्य वचनं श्रुत्वा हर्षितः अभवत् सुग्रीवः।

सेन्द्रानपि सुरान् सर्वांस्त्वं बाणैः पुरुषर्षभ।
समर्थः समरे हन्तुं किं पुनर्वालिनं प्रभो।[13]

इतो ऽपि रामस्य कतिपयाः संवादाः सन्ति किन्तु विस्तारभयात् केवलं महत्त्वपूर्णानां संवादानां विवेचनम् अत्र क्रियते।

**श्रीरामस्य संवादानां वैशिष्ट्यम्**

1) रामस्य संवादाः तस्य व्यक्तित्त्वस्य परिचायकमेव। रामस्य व्यक्तित्त्वं सदा हि संयमितम्। यथा तस्य संवादेषु स्फुटं प्रतीयते। परशुरामेण सह संवादे परशुरामः क्रोधितः रामः अपि क्रोधितः किन्तु आत्यन्तिकसंयमेन सः निर्भयः स्वमतस्य मण्डनं करोति। तस्य भाषा अतीव संयमिता, तस्य वीरस्य कृती एव रामस्य वाणी।

2) सीतायाः विषये प्रथमं सः तां केवलं वनजीवनं कठिनम् इति कारणेन तां न भणति। किन्तु तस्याः निश्चयं दृष्ट्वा न केवलं चित्ते आनन्दितः अपि तु तस्यै अनुमतिं ददाति।मनसि वर्तमाना काचित् सुप्ता गूढा इच्छा रामस्य इति भाति ।

3) हनुमता संवादे रामस्य गुणग्राहकत्वं विशालदृष्टिः च सम्यक् दृश्यते। प्रथममेलने एव रामः हनुमतः गुणान् परिचिनोति।तस्य प्रशंसाम् अपि करोति। हनुमतः वाक्पाटवेन प्रभावितः भवति।

4) कैकेय्या सह सम्भाषणे दुःखितं पितरं दृष्ट्वा सः अतीव दुःखितः। तस्य कारणेन पिता अकारणमेव हताशः जातः। कैकेयी रामेण सह किमर्थं न समभाषत वनवासार्थम् इति तस्य दुःखम्। किन्तु सः तां किमपि न उवाच।पितुः आज्ञापालनं कर्तुं सः सर्वदा तत्परः तत्क्षणे सः वनवासाय अनुमन्यते।

5) कथायाः प्रवाहे कुत्रचित् रामस्य स्वसंवादाः सन्ति। प्रायः सन्ति विलापाः।

**उपसंहारः**

रामस्य संवादाः हृद्याः। रामस्य गुणवर्णनं तस्य संवादेषु स्पष्टं प्रतीयते। तस्य संवादे पार्श्वभूमिम् अनुसृत्य भाषा अभिनिवेशः च वर्तते।तस्य संवादानाम् उद्देशः स्पष्टः, तदनुसारिणी भाषा प्रतिस्पन्दः च, तथैव व्यवहारः इति तस्य वैशिष्ट्यानि।सदा सः संभाषणे स्वमतस्य स्थापनं कुर्वन् दृश्यते किन्तु सीतां लक्ष्मणं वनगमनाय सः अनुमन्यते।तस्य वाणी अतिमधुरा मनोहारिणी उचिता च । विश्वामित्रेण सह संवादे शिष्यत्वं, परशुरामस्य प्रति आदरः किञ्चित् क्रोधः, कैकेय्या कौशल्यया सह संवादे च पुत्रत्वं, हनुमता सह संवादे स्वामित्वं, सुग्रीवेण सह संवादे सख्यं, सीतया सह

संवादे भर्तारत्वं, भरतलक्ष्मणाभ्यां सह संवादे भ्रातृत्वं रामस्य भिन्नभिन्नेषु संवादेषु लक्ष्यते। अत्र संवादकौशल्यस्य सकलगुणाः लभ्यन्ते। रामस्य संवादानां हेतुः स्फुटः, संवादानां माध्यमभाषा सुस्पष्टा, येन श्रोतृभिः सन्देशः सहजतया अवगम्यते। अतः रामस्य संवादाः यशस्विनः। अपेक्षितपरिणामसाधनक्षमाः इति द्रष्टुं शक्यते। अतःश्रीरामस्य संवादाः वाल्मीकिरामायणे पठनीयाः अनुसरणीयाः।

**संदर्भाः**


1) वाल्मीकिरामायणम्, गीताप्रेस, गोरखपूरम् बालकाण्ड २२.१९.पृ ७९
2) तत्रैव, बालकाण्ड 25.17. पृ 84
3) तत्रैव, बालकाण्ड 49. 16,17 पृ 128
4) तत्रैव,. बालकाण्ड 76.6.पृ 173
5) तत्रैव, अयोध्याकाण्ड 19 24. पृ 235
6) तत्रैव, अयोध्याकाण्ड 24. 11 पृ 251
7) तत्रैव, अयोध्याकाण्ड 27.7,12 पृ 259
8) तत्रैव,. अयोध्याकाण्ड 30.39 पृ 266
9) तत्रैव, अयोध्याकाण्ड 102. 3 पृ 435
10) तत्रैव, किष्किन्धाकाण्ड 3.12,13 पृ 650
11) तत्रैव, किष्किन्धाकाण्ड 3.28.230 पृ 651
12) तत्रैव, किष्किन्धाकाण्ड 10. 3 पृ 667
13) तत्रैव, किष्किन्धाकाण्ड 12.8 पृ 673


॥ नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥
नागपूर